# विजयादशमी निर्णयः

**लेखक - प्रो. केशव शास्त्री धर्मसूनु**
प्रस्तोता - **जयप्रकाश शर्मा**
साहित्याचार्य, पाण्डुलिपि एवं लिपि विशेषज्ञ
जयपुर

॥ ॐनमः शिवाय ॥

**जयत्यपर्णाप्राणेशः करुणावरुणालयः ।**
**यत्कृपाऽपाङ्गसङ्गेन शांर्गिणाऽप्यर्हितायितम् ॥**

**सन्निधत्तां सदा वाणी कल्याणी विजयैषिणी ।**
**नलिनीगर्भसौरभ्यस्पर्द्धिसम्भारभासुरा ॥**

**विजयादशमीविनिर्णयं विविधग्रन्थवचोविवेचनैः ।**
**विशदीकरवाणि संस्मरन्मनसा केशवशास्त्रिदैशिकान् ॥**

अस्मिन् वर्षे बहुषु स्थलेषु, परिसङ्ख्यातपञ्चाङ्गपुस्तकेषु शुक्रवारदिने 'विजया' इति लेखदर्शनाद् भ्रान्तैर्गतानुगतिकन्यायविषयैः शुक्रदिने एव विजयादशमी आदृतानुष्ठिता च। इयं च क्लृप्तिर्निर्णयादिग्रन्थतारतम्यपरीक्षणे क्रियमाणे विपरीतैव प्रतिभाति। तथाहि।

निर्णयसिन्धौ तावद् विजयादशमीमुपक्रम्योक्तम् । 'साच द्वितीय- दिने श्रवणयोगाभावे पूर्वा ग्राह्या' इति । सारोद्धाराख्यटीकाकृता नौका- प्रणेत्रा च 'श्रवणयोगाभावे' इति प्रतीकमुपादाय 'कर्मकाले दशमीश्रव णयोगाऽभावे' इति व्याख्यातम् । तथा च प्रकृते शुक्रदिने दशम्याः पञ्च- दशकलावच्छिन्नत्वेनाऽपरन्हे दशमीश्रवणयोगाभावस्य स्पष्टप्रतीतेः पूर्वे द्युरेवोचितेति निरवद्यम्।

अमुमेवार्थे दृढीकर्तुमग्रे 'तदुक्तं हेमाद्रौ स्कान्दे -

**दशम्यां तु नरैः सम्यक्पूजनीयाऽपराजिता**
**ऐशानीं दिशमाश्रित्य अपराह्णे प्रयत्नतः।**

**या पूर्णा नवमीयुक्ता तस्यां पूज्याऽपराजिता**
**क्षेमार्थे विजयार्थे च पूर्वोक्तविधिना नरैः।**

**नवमीशेषयुक्तायां दशम्यामपराजिता**
**ददाति विजयं देवी पूजिता जयवर्द्धिनी।'**

इत्यादिवाक्यैर्नवमीविद्धाया एवोपादेयत्ववचनात्। तथा-

**'आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः**
**एकादश्यां न कुर्वीत पूजनं चापराजितम्।'**

इत्यादिवचनैः पूजनसमये एकादश्याः सर्वथैव हेयत्वकथनाच्च गुरुवा रदिन एव विजयादशमी मन्तुमुचिता।

यत्तु - **'उदये दशमी किञ्चित् सम्पूर्णैकादशी यदि**
**श्रवणर्क्षे यदा काले सा तिथिर्विजयाभिधा।'**

इति कश्यपवचनं तत्तु यात्राप्रस्थानपरम्। अनन्तरमेव

**'श्रवणर्थे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः**
**उल्लङ्घयेयुः सीमानं तद्दिनर्क्षे ततो नराः।'**

इति श्लोके, यतः काकुत्स्थः प्रस्थितोऽतो जनाः सीमानमुल्लङ्घयेयुरिति निस्तुषविधिप्रदर्शनेन विस्पष्टीकृतत्वात्। स्मृतिनिबन्धे च 'श्रवणर्क्षे तु पूर्णायाम्' इति 'उदये दशमी किञ्चिद्' इति च वाक्यद्वयमुपन्यस्याऽग्रे-'

**दशमी तु कलामात्रा आश्विने श्रवणान्विता**
**यात्रायां सकला ज्ञेया राज्ञां पट्टाभिषेचने।'**

इति भृगु वचनेन सह पूर्वोक्त वाक्यद्वयस्यैक वाक्यता प्रदर्शनपूर्वकं वाक्य त्रयस्यापि यात्राभिषेक मात्र परत्वस्योपपादनात्तादृश दिनस्यापराजिता पूजन शमीपूजनादि कर्मप्रवृत्त ये विजयादशमीत्वेन कल्पनमशास्त्रीयमेवेति सहृदयबुद्धिप्रसराऽविसंवादि।

यद्यपि 'श्रवणर्क्षे तु पूर्णाया' मितीदं पद्यं पूर्वोक्तकश्यपवचनोपजीवक तयेवावधृतं ग्रन्थकृता तथापि वाक्यार्थतत्त्वावमर्शे 'श्रवणर्क्षे तु पूर्णाया' मित्यत्र 'तद्दिनर्क्षे' इत्यत्र च तिथिनक्षत्रयोरुभयोः साहचर्यविवक्षा सुस्पष्टै वेति यदैव दशमीश्रवणयोगस्तस्मिन्नेवाऽनेहसि यात्राप्रस्थानं विधेयमित्यर्थ लाभेन न पूर्ववाक्योपजीवकताऽस्य वाक्यस्य समीची।

अपि च निदर्शनपरोत्तरवाक्ये कालस्य चानिर्देशादपराजितापूजनादेस्तु 'अपराह्णो मुख्यः कालस्तत्रैव पूजाद्युक्ते' रिति स्वयमेवाग्रेऽभिधानेनऽ पराह्णरूपविशिष्ट कालप्रवर्त्तनीयत्व निर्णयान्नेदं वचनमपराजितापूजनादिविषयमिति निर्विवादम्।

किञ्चाग्रे 'काले' इति पदस्यार्थै प्रदर्शयता सिन्धुकृता स्वयमेव 'काले अपराह्णे श्रवणयोगाऽभावे तु सर्वपक्षेषु पूर्वैव' इति निर्णीतत्वात्।

न च प्रकृते शुक्रवारदिनेऽपराह्णे श्रवणयोगोऽस्तीति वाच्यम् 'काले' इति सप्तम्यन्ततया निर्दिष्टस्य कालस्याधारत्व कथनेनान्वय योग्य शक्त्यन्तरोपक्ष याद्वितीय प्रतियोगि साऽपेक्षस्य श्रवणयोगस्य अनायासोपस्थि तया दशम्यैव सह वक्तुमुचितत्वात्तादृश दशमी श्रवणयोगस्य चाऽपराण्हेऽभा वान्न शुक्रवारदिनं विजयादशमीभावाय कल्पते इति रहस्यम्।

किञ्च पट्टाभिषेकप्रकरणे -

**ईषस्य दशमीं शुक्लां पूर्वविद्धां परित्यजेत्**
**श्रवणेनापि संयुक्तां राज्ञां पट्टाभिषेचने ।।**

इति वाक्येन शमीपूजनादौ पुराणसमुच्चयादिवचोभिः प्रशस्तस्यापि नवमी विद्धत्वस्यानुपादेयत्व कथनपूर्वकं -

**सूर्योदये यदा राजन् दृश्यते दशमीतिथिः ।**
**आश्विने मासि शुक्ले तु विजयां तां विदुर्बुधाः ॥**

इति पट्टाभिषेक विधावौदयिक्या एव विषयविभागेन विजयात्वमुक्तं । तद्वदत्रापि यात्राप्रस्थान रूपविषय विभागेन **'उदये दशमी किञ्चिद्'** इतिवाक्यस्याऽगतिकत्वाऽपनयनं प्रमाणपरिगृहीतमिति न काप्यनुपपत्तिः । **'श्रवणस्तु रोहिणीवदप्रयोजक'** इति निर्णयसिन्धुकृता स्ववाक्य एवाऽवहेलनेनाऽनत्यादरणीयत्व प्रदर्शनात् तिथिप्रधान पर्वत्वेनाभिमताया विजयादशम्या नक्षत्रानुरोधेन वास्तवप्राधान्योत्सादनस्याऽन्याय्यत्वात्।

यत्तु 'दिनद्वयेऽपराह्णस्पर्शे पूर्वा, तत्रापि परदिनेऽपराण्हे श्रवणसत्त्वे परैवेति दिक्' इति वाक्यखण्डे 'श्रवणसत्त्वे' इत्यतः परं 'परैवे'त्यतः प्राक् 'स्वल्पापि' इति पदमाधुनिककाशीमुद्रितपुस्तके दृश्यते तत् सारोद्धार- कर्त्रा 'श्रवणसत्त्वे' इति प्रतीकमुपादाय 'दशमीश्रवणसम्बन्धसत्त्वे एव अत्र चापराण्हस्त्रेधाविभक्तदिनतृतीयभाग' इति विवरणात्। मूले च दिन द्वये तिथेरपराह्णस्पर्शमुद्भाव्य 'तत्रापी'ति पूर्वपरामर्श कतच्छब्दव्यपदेश्यापराण्ह स्पृष्टतिथावपरदिने श्रवणसत्त्वे इति स्वर सप्रकटनपुरःसरं केवल श्रवणोपपन्नस्यापराण्हस्याऽविवक्षाया अयत्नबोध्यत्वात् प्राचीनलिखितपुस्तकेषु मुम्बयी-लखनऊ प्रभृति स्थलमुद्रितेषु च पुस्तकेषु क्वाऽप्यनुपलम्भात् प्रक्षिप्तं पूर्वापरग्रन्थसङ्गतिविघातकं चेति सर्वथाऽनादरणीयमेव।

किञ्चाश्विनशुक्लषष्ठीनिर्णये 'अत्र सर्वत्र तिथिनक्षत्रयोगादरो मुख्यः कल्पस्तदभावे तु तिथिरेव ग्राह्या-

**तिथिः शरीरं देवस्य तिथौ नक्षत्रमाश्रितम्**
**तस्मात्तिथिं प्रशंसन्ति नक्षत्रं न तिथि विना।**

इति विद्यापति लिखितवचनात् -

**तिथिनक्षत्रयोर्योगे द्वयोरेवानुपालनम्**
**योगाऽभावे तिथिर्ग्राह्या देव्याः पूजनकर्मणि।**

इति तत्रैव देवलोक्तेश्च' इत्येवं सार्वत्रिकनिर्णय प्रकाशनेनाऽव्यवहिते दशमीनिर्णयेऽमुष्यैव वाक्यद्वयस्य निर्णायकतयाऽनुवर्तनस्य सिन्धुकृता स्वयमेवाऽनुमोदितत्वात्।

ज्योतिर्विदाभरणकृता सरस्वतीप्रसादपात्रेण कालिदासेनापि -

**"अथाश्विने या दशमी निशामुखे, शुक्ला स्मृता सा विजया बुधैरिह।**
**अर्कान्वितां बोधियुतां शमीमुत , क्षितीश्वरः सर्वजनश्च पूजयेत्॥**

**दिनावसानद्वयगामिनी यदा, पूर्णा तदैवं विजया परा भवेत्।**
**नवेति दोषाननैकटादृता, शम्यर्चने सर्वहरिज्जयाय सा॥"**

इति निर्णयं प्रदर्शयता निक्षिप्यानादरकुक्षौ श्रवणर्क्षे प्रदोषव्यापिन्याः पूर्णाया एव ग्राह्यत्वकथनात् सत्यपि ग्रन्थान्तरमते श्रवणयोगप्राशस्त्ये केवलश्रवणस्य सर्वथाऽप्रयोजकत्वात्।

अचलनिबन्धेऽपि 'आश्विनशुक्लदशम्यां पूर्वतिथ्यन्वितायां श्रवणर्क्षयुतायां चापराजितां पूजयेत्ततः प्रस्थानं कुर्यात्। तदुक्तमीश्वरेण-

**आश्विने शुक्लपक्षस्य दशम्यामपराजिता।**
**पूजनीया नरैः सम्यगपराहे प्रयत्नतः ।।**

ऐशानीं दिशमाश्रित्य नैकादश्यां कदाचन।'

**इत्युक्त्वाऽग्रे-** **'या पूर्णा नवमीयुक्ता तस्यां पूज्याऽपराजिता।**
**ददाति विजयं देवी पूजिता जयवर्द्धिनी ।।**

**नवम्या सह कार्या स्याद्दशम्याश्वयुजः सिता।**
**न कुर्यात्तात दशमीमेकादश्यां कदाचन ।।**

**दशम्यां रुद्रयुक्तायां पूजयेदपराजिताम्।**
**महापूजनमप्यत्र कृतमप्यकृतं भवेत् ।।**

**रुद्रैकादशी -** **प्रस्थानमपि दशम्यामेव कार्यमित्यपि तत्रैव,**
**'जम्भः शक्रेण निहतो दशम्यां प्रस्थितेन तु**
**तस्माद्दशम्यां कुर्वीत्, सीमालङ्घनमादरात् ।। इति।'**

**'श्रवणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः।**
**उल्लङ्घयेयुः सीमानं तद्दिनर्थे ततो नराः ।।**

इति तु श्रवणर्क्ष सम्भवाभिप्रायेण तदभावे तु केवलदशमी प्रशस्तोक्ता स्कन्दपुराणे-

**दशमीं यः समुल्लङ्घय प्रस्थानं कुरुते नृपः,**
**तस्य संवत्सरं राज्ये न कापि विजयो भवेत्।'**

इत्यतोऽपराजिता पूजनादाववश्यापेक्षं दशम्या विद्यमानत्वम्। तथा चोक्तं सिद्धान्तप्रणेत्रा लल्लेन-

**तिथिः शरीरं तिथिरेव कारणं**
**तिथिः प्रमाणं तिथिरेव साधनम्।** इत्यादि।

तथा च विश्वरूपः।

**दशम्यन्तमतिक्रम्य करोत्येकादशीदिने।**
**सीमाया लङ्घनं तच्च नैहिकामुष्मिकप्रदम् ।।**

गार्ग्योऽपि-

**तिथिष्वविद्यमानेषु कर्म कुर्वन्ति ये नराः ।**
**वृथा भवेत्कृतं तेषां न तदुक्तं फलं भवेत् ॥**

विश्वरूपनिबन्धेऽपि -

**आश्विनस्य सिते पक्षे सीमातिक्रमणोत्सवः ।**
**विजयायां दशम्यां तु कर्त्तव्यो विजयैषिभिः ।।**

**नवम्या सहिता कार्या दशम्याश्वयुजः सिता ।**
**एकादश्या युता जातु न कार्या जयकाङ्क्षिभिः ॥ इति ।**

कालनिर्णये -

**रिक्तायुक्ता तु या पूर्णा तस्यां पूज्यापराजिता ।**
**ददाति विजयं सौख्यं यात्रायां सर्वदिक्ष्वपि ।।**

**आश्विनस्य सिते पक्षे दशम्यां सर्वदिक्षु च ।**
**सायंकाले शुभा यात्रा दिवा वा विजयक्षणे ॥**

**ईषत्सन्ध्यामतिक्रान्तः किञ्चिदुद्भिन्नतारकः ।**
**स कालो विजयो ज्ञेयः सर्वकार्येषु सिद्धिदः ।।**

**एकादशो मुहूर्तोऽपि कथितो विजयः क्षणः ॥**
**इत्यादिषु सर्वत्र कर्मकाले व्याप्तिमत्यास्तिथेरेवोक्तत्वात् ।**

वल्लभाचार्यमतीयोत्सवमालायामपि 'अत्रायं राद्धान्तः। अपराह्णो मुख्यः कर्मकालस्तत्रैव पूजनाद्युक्तेः। प्रदोषो गौणः । तत्र दिनद्वयेऽपराण्हव्यापित्वे पूर्वा प्रदोषव्याप्तेराधिक्यात् । दिनद्वये प्रदोषव्यापित्वे पराऽपराण्ह-

व्याप्तेराधिक्यात्। श्रवणस्तु रोहिणीवदप्रयोजकः। दिनद्वयेऽपराण्ह स्पर्शे तु पूर्वा, तत्रापि परदिनेऽपराएहे श्रवणसत्त्वे परैवेति दिक्' इति निर्णीतं। एतस्मिन्नपि वाक्ये 'तत्रापी'ति खण्डस्थित तच्छब्दरूप सर्वनाम स्वाभाव्येना कृप्यानुवृत्तेऽपराण्ह स्पृष्टदशमीके परदिनेऽपराण्हे श्रवणसत्त्वे एव परा इत्यर्थ लाभेन केवल श्रवणस्याऽत्यन्तमप्रयोजकत्वात्।

मुहूर्तचिन्तामणावपि -

**'इषमासि सिता दशमी विजया, शुभकर्मसु सिद्धिकरी कथिता।**
**श्रवणर्क्षयुता सुतरां शुभदा, नृपतेस्तु गमे जयसिद्धिकरी ।।'**

इति पद्ये पूर्वार्द्धेन शुभकर्मप्रवृत्तिमभिधाय परार्द्धेन नृपतेस्तु गमे (प्रस्थाने) श्रवणर्क्षयुता सुतरां शुभदा इति श्रवणयुक्ताया दशम्याः 'सुतरा' मिति तरबन्तनिर्देशेन प्रस्थानविषये विशेषशुभप्रदत्व मुक्तं न परं दशमीरहितस्य श्रवणमात्रस्येति स्फुटमेव। तट्टीकायां च दशमीप्राधान्यप्रदर्शनाय -

**'मासीषे शुक्लदशमी कथिता विजयाभिधा।**
**विजयस्तत्र यातृणां सन्धिर्वा न पराजयः ।।'**

इति कश्यपवचनमुपन्यस्तम्।

किञ्च अचलदीपिकायां कर्मपार्थक्यं विवेकेन प्रदर्शितम्। तथाहि 'आथर्वणगोपथब्राह्मणे नवम्यां प्राण्हे वाहान्स्नापयित्वा विचित्रवासोभिरलं- कृत्य गन्धपुष्पदधिदूर्वाक्षतादिना नानाविधफलैर्विविधान्नादिभिश्च शान्तिसूक्तैर्माङ्गल्यभेरीपटहादिनादैश्च सह पूजयेत्' इत्यादिना वाहनपूजामुक्त्वाऽऽयुधपूजान्तमुक्तं कर्म। अनन्तरम् आश्विनशुक्लदशम्यां पूर्वतिथ्यन्वितायां श्रवणयुतायां चापराण्हेऽपराजितां पूजयेत्ततः प्रस्थानं कुर्यात्।

तथाचोक्तं -

**जम्भः शक्रेण निहतो दशम्यां प्रस्थितेन तु**
**तस्माद्दशम्यां कुर्वीत सीमालङ्घनमादरात्।**

इति। 'श्रवणर्क्षे तु पूर्णाया' मिति तु श्रवणयोग सम्भवाऽभिप्रायेण। तदभावे तु केवलदशम्यामेव प्रस्थानमपि विधेयम्। न त्वेकादश्यां 'दशमीं यः समुल्लङ्घय' इत्यादि स्कन्दपुराणादिवचनैर्निन्दापूर्व निषेधात्। अतोऽपराजितापूजनादौ दशम्येव ग्राह्येति सिद्धम्।

ननु निर्णयामृतादिग्रन्थेषु 'आश्विनशुक्लदशम्यां पूर्वतिथ्यन्वितायां श्रवणर्क्षयुक्तायां चापराजितां पूजयेत्प्रस्थानं च कुर्यादिति समादिष्टं तत्कथं केवलदशम्यां पूजनाद्यनुष्ठेयमिति चेत् अत्रेत्थं विचारः। दशमी तावददवेधा शुद्धा विद्धा च, तत्रापि श्रवणयोगवती तदभाववती च। तत्र दशम्याः शुद्धत्वेन प्रदोषव्यापित्वे न सन्देहः। विद्धायामपि अस्तात्पूर्व त्रिमुहूर्त्तात्मककाले दशमीप्रवेशे प्रदोषव्याप्तेः सत्त्वात्तद्दिनेऽपराजितार्चनादिकं विधेयम् । तत्र दिवसेऽर्चनसमये श्रवणयोगस्यातिप्राशस्त्यम्। दिनद्वये दशम्याः प्रदोषव्यापित्वे यद्दिने श्रवणयोगः सैव ग्राह्या तत्सम्बन्धाऽभावे तु परैव अपराह्णव्याप्तेराधिक्यात् । दिनद्वयेऽपराह्णव्यापित्वे पूर्वैव प्रदोषव्याप्तेराधिक्यात् । यानि तु श्रवणस्य प्राधान्यद्योतकानीव वचांसि तानि वैश्वानराधिकरणन्यायेन प्राशस्त्यमात्रपर्यवसायीनि नतु तेषां स्वार्थे प्राधान्यं श्रवणस्य रोहिणीवदप्रयोजकत्वात्। नापि तयोरविनाभाविसम्बन्धः तत्साहचर्यस्य शतशो व्यभिचारदर्शनात्-

**'याः काश्चित्तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः।**
**तास्तु सर्वाः प्रकर्त्तव्याः श्रवणं रोहिणीं विना ॥'**

इत्यभियुक्तोक्तेश्च दशम्या एव प्रदोषव्यापिन्याः प्राधान्येनोपादेयत्वं सिद्धम्। प्रदोषपदमपराह्णस्याप्युपलक्षणं उभयथापि दर्शनेन प्रदोषाऽपराण्हान्यतरव्यापित्वमवष्टब्धव्यम्। द्वयोः साम्पातिके तु यदनुष्ठेयं तन्निर्णीतं प्राङ् निर्णेष्यते चाग्रे।

अयं च कालनिर्धारः शब्दनिर्वचनेनाऽप्यवगम्यते। तथाहि। राज्ञां विजयार्थप्रस्थानयोग्या दशमी विशिष्टजयार्था वा दशमी विजयादशमी यद्वा विपूर्वकजिधातोः 'एरच्' इत्यनेनाचि सिद्धाद्विजयशब्दात् 'तत्करोति तदाचष्टे' इत्यनेन णिचि पचाद्यचि सिद्धविजयाशब्दवृत्तदशमीशब्दस्य विजयर्त्री दशमीत्यर्थकस्याऽऽगमप्रमाणेनेपशुक्ल-दशमीवाचकत्वम्। नह्यत्रागममन्तरा निर्वाहः। धर्मशास्त्रादिषु निरस्यगणितभागं सर्वत्रागमस्यैव प्र माणत्वेनोररीकारात् । आबन्तविजयाशब्दस्तु प्रकारतासम्बन्धेन दशम्यन्वयी । यद्वा विजयक्षणे वर्त्तमाना दशमी विजयादशमी । विजयक्षणस्तु-

**'ईषत्सन्ध्यामतिक्रान्तः किञ्चिदुद्भिन्नतारकः**
**स कालो विजयो ज्ञेयः सर्वकार्येषु सिद्धिदः।**
**एकादशो मुहूर्त्तेऽपि विजयः परिकीर्त्तित्ततः ॥'**

इति ज्योतिर्निवन्धे रत्नकोशे च नारदवचनेन -'

**आश्विनस्य सिते पक्षे दशम्यां तारकोदये।**

**स कालो विजयो ज्ञेयः सर्वकार्यार्थसिद्धये ।।**

' इति चिन्तामणिधृतसुमन्तुवाक्येन च-

नारायणीयधर्मवृत्तावपि 'ईषत्सन्ध्ये'ति वाक्यमुदाहृत्य तारकोदयकाल- मुख्यत्वमभिधाय -

**आश्विनस्य सिते पक्षे दशम्यां सर्वदिक्षु च ।**
**सायंकाले शुभा यात्रा दिवा वा विजयक्षणे ।।**

इति कथनेन च स्थूणानिखननेनावधारितोऽवगन्तव्यः ।
तदतिरिक्तकाले शमीपूजनादिकं त्वनाचार एव केवलम् ।

नच 'दिवा वा विजयक्षणे' इति वाक्ये वाशब्देन विकल्पनादेकादशो मुहूर्तोऽपि तारकोदयकालसम एवेति वाच्यम् । वाशब्दस्यात्रोनास्था- वाचकत्वेन 'एकादशो मुहूर्तोऽपि 'त्युत्तरत्रापिशब्दस्यापि तथात्वेन तस्य गौणतायाः स्फुटं प्रतीयमानत्वात् । न चायं षोडशीग्रहणाग्रहणतुल्यकोटिको विकल्पः । दिनद्वये प्रदोषव्याप्तिविरहे तदुपयोगात् । यत्र क्वापि मुख्यत्वोक्तिपराह्णस्य सापि प्रदोषव्याप्तिवैशिष्ट्यावगाहितयैव न तु केवलस्यापराह्णस्य प्राधान्यसमर्पिकेति तत्त्वम् । एवं सति प्रदोषो मुख्यः कालः एकादशो मुहूर्त्तस्तु गौण इति प्रदोषव्यापिन्यामेव दशम्यां शमीपूजनादि-कमनुष्ठेयमिति सिद्धम् । तदुक्तम्-

**'कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिः ।**
**तया कर्माणि कुर्वीत ह्रासवृद्ध्याद्यकारणम् ।।'**

भविष्योत्तरेऽपि -

**'ह्रासे वा यदि वा वृद्धौ साम्ये वाऽपि तिथेः सिता ।**
**प्रदोषव्यापिनीषस्य दशमी विजयप्रदा ।।'** इत्यादिवाक्यैः ।

निर्भयरामकृत उत्सवनिर्णयेऽपि "आश्विने शुक्लदशमी विजयादशमी । तत्र भगवति यवनवदलार्पणं कार्य । तत्र नक्षत्रोदयकालो मुख्यः । 'ईषत्सन्ध्यामतिक्रम्ये' त्यादिवाक्यात् । सूर्योदयादेकादशो मुहूर्तस्तु गौणः । 'एकादशो मुहूर्तोऽपि विजयः परिकीर्त्तित' इत्यत्रा 'पि' शब्देन गौणत्वसूचनात्" इत्युक्त्वाऽनन्तरमेव 'तत्रैवं निर्णयः । दशमी हि द्विविधा श्रवणर हिता तद्युक्ता चेति । तत्रापि श्रवणरहिता चतुर्विधा । पूर्वेद्युरेव नक्षत्रोदयव्यापिनी परेद्युरेव तद्व्यापिनी दिनद्वयेऽपि तद्व्यापिनी दिनद्वयेऽपि तद्व्याप्तिरहिता चेति । तत्र पूर्वेद्युरेव नक्षत्रोदयव्याप्तौ पूर्वैव । परेद्युरेव तथात्वे परैव

। दिनद्वयेऽपि तद्व्याप्तौ पूर्वा ग्राह्या -

**'नवम्या सहिता कार्या दशम्याश्वयुजः सिता ।**
**एकादश्या युता जातु न कार्या जयकाङ्क्षिभिः ।।'**

इतिवाक्यात् । दिनद्वयेऽपि प्रदोषव्याप्त्यभावे परैव 'एकादशो मुहूर्तो पी'ति वाक्यनिगदित गौणविजयक्षणव्यापित्वात् । अथ श्रवणयोगे तु पूर्वेद्युरेव नक्षत्रोदये दशम्याः श्रवणयोगे पूर्वैव । परेद्युरेव तथात्वे परैव । यदा तु दिनद्वयेऽपि कर्मकाले दशम्याः श्रवणयोगस्तदा पूर्वैव ग्राह्या 'नवम्या सहिते' त्यादिवाक्यैः पूर्वविद्धायाः प्रशंसनात्" इति ।

निर्णयप्रतानेऽपि प्रतापमार्त्तण्ड-निर्णयामृत-भगवद्भास्कर-दिनकरोद् दघोत-हेमाद्रि सिन्धुप्रभृतिग्रन्थवचांसि सङ्गृह्य पट्टाभिषेकयात्राप्रस्थानपरत्वेन श्रवणर्क्षयोगस्य प्राशस्त्यप्रतिपादनाय 'यत्पुण्यं नक्षत्रं तद्वत्कुर्वीत' इत्यादि नक्षत्रेष्टिपरमपि गोपथश्रुतिवाक्यं महता विस्तरेण दशमीविषयेऽपि प्रपंच्य 'या पूर्णा नवमीयुक्ते'त्यादिपुराणसमुच्चयवचोऽनुरोधेन 'यत्तु एकादश्यां न कुर्वीतेत्यादिनिषेधवचनं तदपराजिताद्यर्चनविषयं राजविषयञ्चे'ति निर्णीय 'अपराजितापूजनसीमोल्लङ्घनादिकं तु पूर्वेद्युरेवे'ति निरधारि ।

यत्तु धर्मसिन्धौ काशीनाथोपाध्यायै 'रथविजयादशमी'त्युपक्रम्य 'सा परदिने एवापराह्णव्याप्तौ परा । दिनद्वयेऽपराण्हव्याप्तौ दिनद्वयेऽपि श्रवण- योगे सत्यसति वा पूर्वा । एवं दिनद्वयेऽपराह्णव्याप्त्यभावेऽपि श्रवणयोग-सत्त्वासत्त्वयोः पूर्वैव । दिनद्वयेऽपराह्णव्याप्त्यव्याप्त्योरेकतरदिने श्रवणयोगे यद्दिने श्रवणयोगः सैव ग्राह्या । एवमपरा कदेशव्याप्तावूह्य' मित्यन्तमुचितदेश्यमभिधाय 'यदा पूर्वदिन एवापराण्हव्याप्ता परदिने च श्रवणयो- गाभावस्तदापि पूर्वैव । यदा तु पूर्वदिन एवापराह्णव्यापिनी परदिने च मुहूर्तत्रयादिव्यापिनी अपराण्हात्पूर्वमेव समाप्ता परत्रैव श्रवणयोगवती तदा परैव" इत्युक्त्वा "अपराण्हे दशम्यभावेऽपि 'यां तिथिं समनुप्राप्य उदयं याति भास्कर' इति साकल्यवचनेन श्रवणयुक्ताया ग्राह्याया औदयिकस्वल्पदशम्याः कर्मकाले सत्त्वापादनात्" इत्युक्तं तदतिरभसात् ।

**यां तिथिं समनुप्राप्य उदयं याति भास्करः,**
**सा तिथिः सकला ज्ञेया दानाध्ययनकर्मसु ।'**

इति वचनं दानेष्वध्ययनेषु च औदयिक्यास्तिथेः कात्स्न्र्येन प्रवृत्तिबोधकम् । तद्यथा । षट्तिलायां तिलदानमौदयिक्यामपि मुहूर्त्तमात्रायामेकाद- श्यामापरोदयमेकादशी प्रवृत्ति वद्विधेयम् । एवं प्रतिपदि अनध्याय उक्तः । सूर्योदये मुहूर्त्तकल्पायामपि तस्यामापरोदयं प्रतिपत्प्रवृत्तिवन्मत्वा नाध्ययनमनुष्ठेयमित्यादि । अतो नैतद्वाक्यं

विजयादशमीनिर्णय व्यवस्थायां प्रवेशमर्हतीति स्फुटमेव।

न च 'कर्मसु' इति पदेऽन्येषां कर्मणां समावेशाद्विजयादशमी निर्णयेऽपि युक्त एवाऽऽकर्ष एतस्य वाक्यस्येति शङ्कयम्।

दानानामध्ययनानां च कर्मत्वानतिरेकात् केवलं 'कर्मसु' इत्यनेनैव गतार्थत्वाद्दानाध्ययनपदयोः पृथगुपादानं परिगणनमेव गमयतीति निर्विवादम् । कर्मस्विति बहुवचनं तु दानाध्ययनानां बहुत्वाभिप्रायमिति न कोऽपि शङ्कावकाशः । एवंचैतादृशामन्यपरतयोक्तानां वाक्यानां तत्त्वार्थानवबोधमूलकभ्रान्तिवशतामापद्य परःशतैर्ग्रन्थवचोभिः प्रदोषव्याप्तिविशिष्टत्वे- नाभिमताया विजयादशम्या दशमीगन्धाभाववति केवले श्रवणे सत्त्वापा- दनं साम्प्रतमसाम्प्रतं वेति विवेचयन्तु निष्पक्षपातिनः सुधियः। यत्तु कश्यपवचनं 'उदये दशमी किंचिदित्यादि' तत्तु-

**'दशमी तु कलामात्रा आश्विने श्रवणान्विता**
**यात्रायां सकला ज्ञेया राज्ञः पट्टाभिषेचने ।'**

इति स्मृतिनिबन्धोक्तवाक्येन सहैककण्ठ्यापादनेन पूर्वोक्तविस्तृतप्रपञ्चेन च यात्राभिषेकेपरमिति पूर्वमेव सिद्धान्तितमतः पिष्टपेषणमननुरुन्धानेन न पुना रारट्यते मया।।

किञ्च श्रीमदल्लाडनाथविरचिते निर्णयामृते 'आश्विनशुक्लदशम्यां नवमीयुक्तायां श्रवणर्क्षयुतायां चापराजितापूजनं प्रस्थानं च कुर्या'दिति यथासङ्ख्य निर्देशे नापरा जिता पूजायां नवमीविद्धत्वस्य प्राधान्यमभिव्यञ्जितमुपष्टब्धं चोत्तरवाक्यैः 'दशम्यां तु नरैः सम्यक्' 'या पूर्णा नवमीयुक्ता' 'नवमी शेषयुक्तायां' 'आश्विने शुक्लपक्षे तु' इत्यादि निर्णयसिन्धुप्रस्तावे हेमाद्रिस्कन्दादिनामग्राहमुदाहृतैः अग्रे च 'प्रस्थानमपि दशम्यामेवेत्युक्तं स्कन्दपुराणे-

**"दशमीं यः समुल्लङ्घय प्रस्थानं कुरुते नृपः**
**तस्य संवत्सरं राज्ये न क्वापि विजो भवेत्" इत्यभिधाय**

'इदं च श्रवणासम्भवे वेदितव्यं श्रवणसम्भवे तु श्रवणयुक्तायामेव दशम्यां प्रस्थानं तदुक्तं "श्रवणर्क्षे तु पूर्णाया" मिति प्रदोषव्याप्तिमतो- र्दशमीश्रवणयोर्योगोऽपि प्रशंसितः । न परं केवलं श्रवणमेव विजयादशमीत्वेन विहितमिति स्पष्टम्।

दैवज्ञसङ्गमेश्वरविश्वनाथोऽपि स्वकृतव्रतराजे नवमीविद्धायाः प्रशस्तिमुक्त्वाऽन्ते 'दिनद्वये विजयक्षणव्याप्तावव्याप्तौ वा श्रवणर्क्षयुता ग्राह्ये'त्युक्तवान्। तेन एकतरदिने दशम्या विजयक्षणव्याप्तौ तादृशव्याप्यभाववत्याः परस्याः सत्यपि श्रवणर्क्षसबंन्धे ग्राह्यत्वानाग्रहमूलकोऽग्राह्यत्व- ध्वनिः सूचितः।

अपि च श्रीवीरबुक्कणनृपामात्यमाधवसायनेन स्वकृतकालमाधवे दशमी- निर्णयमुपक्रम्य 'प्रतिपत्सम्मुखी कार्ये'ति सामान्यनियममुद्भाव्य दशम्या मूलाग्रयोर्द्वयोरपि मुखत्वादुभयत्र सामान्येन पूज्यत्वान्नियामकान्तराभा- वात्पूर्वोत्तरविद्धयोरन्यतरग्रहणे 'व्रीहिभिर्यजेत यवैर्वे' तिवदैच्छिकविकल्प- मुट्टङ्कय-

**'दशमी चैव कर्त्तव्या, सदुर्गा द्विजसत्तमाः।**

' इति स्कन्दपुराणवचनम्,

**'प्रतिपत्पञ्चमीभूता सावित्री वटपूर्णिमा।**
**नवमी दशमी चैव नोपास्या परसंयुता।'**

इति ब्रह्मवैवर्त्तवचने नोपष्टब्धम्,-

**'नन्दाविद्धा तु या पूर्णा द्वादशी मकरे सिता।**
**भृगुणा नष्टचन्द्रा च एता वै निष्फलाः स्मृताः।'**

इति कूर्मपुराणवचनं चोपन्यस्याग्रे 'अत्रैकादश्या नन्दात्वाद्दशम्याश्च पूर्णात्वादेकादशीविद्धा दशमी निष्फलेति गम्यत' इत्युक्त्वा 'बाढ' मित्यङ्गीकारो दर्शितः।

**अतःपरं 'निषेधोऽयं कृष्णपक्षविषयतया योजनीयः'** इति यदुक्तं तन्मे मातावन्ध्ये" तिवद्याहतम्। उपर्युदाहृत 'प्रतिपत्पञ्चमीभूते' त्यादिब्रह्मवैवर्त्तवाक्ये उपात्तायाः सावित्रीवटपूर्णिमायाः कृष्णपक्षान्तः पातित्वात्यन्ता- भावप्रतियोगित्वात् 'नन्दाविद्धे 'ति कूर्मपुराणवचनेऽपि 'सिते'ति पदोपलम्भेन च सर्वेषां वचनानां कृष्णपक्षैकविषयत्ववचनं केवलं साहसमात्रमेवेति विपश्चिद्वर्यैः सुवचं भविष्यतीति। एवं च सति पूर्वोक्तं 'दशमी चैव कर्त्तव्या सदुर्गे'ति स्कन्दपुराणवचोऽप्युपपन्नं भवतीति सर्व समञ्जसम्।

किंच भगवद्भास्करप्रणेत्रा भट्टनीलकण्ठेनापि भगवद्भास्करस्य तृतीये समयमयूखे **"आश्विनशुक्लदशमी विजयादशमीत्युच्यते**। सा तु शमीपूजायां नक्षत्रोदयव्यापिनी ग्राह्या। तदुक्तं रत्नकोशे-

**'ईषत्सन्ध्यामतिक्रम्य किञ्चिदुद्भिन्नतारकः**
**स कालो विजयो ज्ञेयः सर्वकार्यार्थसाधकः।' इति।**

चिन्तामणावपि -

**आश्विनस्य सिते पक्षे दशम्यां तारकोदये।**
**विजयो नाम कालोऽयं सर्वकार्येषु सिद्धिदः ।।॥ इति।**

अपराजितापूजायां तु अपराह्णव्यापिनी ग्राह्या। 'आश्विने शुक्लपक्षे' त्वित्युपक्रम्य -

**'दशम्यां च नरैः सम्यक्पूजनीयाऽपराजिता।**
**ऐशानीं दिशमाश्रित्य अपराह्ने प्रयत्नतः।**

इति पुराणसमुच्चयवचनात्। दिनद्वये तद्व्याप्तौ पूर्वैव-

**या पूर्णा नवमीयुक्ता तस्यां पूज्याऽपराजिता।**
**क्षेमार्थे विजयार्थे च पूर्वोक्तविधिना नरैः ॥**

**नवमीशेषयुक्तायां दशम्यामपराजिता।**
**ददाति विजयं देवी पूजिता जयवर्धिनी ।।**

**आश्विने शुक्लपक्षे तु दशम्यां पूजयेन्नरः।**
**एकादश्यां न कुर्वीत पूजनं चापराजितम् ।।'**

इति पुराणसमुच्चयवचनात्। देशान्तरयात्रा तु पूर्वोक्ततारकोदय- रूपसन्ध्याकाले कार्या। दिनद्वये तारकोदयकालव्याप्त्यभावे परदिने एकादशमुहूर्ते यात्रा कार्या-

**आश्विनस्य सिते पक्षे दशम्यां सर्वदिक्षु च।**
**सायंकाले शुभा यात्रा दिवा वा विजयक्षणे ॥**

**इति 'एकादशो मुहूर्तोऽपि विजयः परिकीर्तितः।**
**तस्मिन्सर्वैर्विधातव्या यात्रा विजयकाङ्क्षिभिः ।।'**

इति च भृगूक्तेः। पूर्वदिने एकादशमुहूर्त्तं व्याप्त्यभावे परदिने श्रव- णयोगश्चेत्तदैव यात्रा कार्या। तत्पूजा तु पूर्वदिन

एव । 'उदये दशमी किंचि' दिति कश्यपवचनात् ।।" इत्येवं अपराजितापूजनेऽपराह्णव्यापिनी शमीपूजने च तारकोदयव्यापिनी यात्रायां च तारकोदयव्यापिनी तदभावे गौणविजयक्षणव्यापिनी तत्रापि श्रवणयोगस्य प्राशस्त्यात्तद्युक्तायामेव यात्रा कार्येति यात्राप्रस्थानपरत्वमैकान्त्येन श्रवणयोगस्योक्तमिति विषय-विभागेनासन्दिग्धस्त्रिविधो निर्णयः प्रदर्शितः । अस्य च भगवद्भास्करग्रन्थस्य प्रकृष्टं प्रामाण्यं सर्वधर्मशास्त्रग्रन्थानां मूर्द्धन्यत्वेन सकलेऽप्यार्यावर्ते वरीवर्तीति न विसंवादास्पदम् । यतोऽन्यदेशीयैर्यूरोपीयनैरपि तदवयवा व्य-वहारमयूखादयो व्यवहारविनिर्णयेषु स बहुमानमाद्रियन्ते । गीर्वाणभाषायां कृतानल्पश्रमेण पुष्कलाधीतिना भट्टबुल्हरेणापि स्वकृत 'हिन्दुला' प्रस्तावेऽसाधारणगुणगरिम्णोपवर्ण्य सुष्टुतोऽसौ नीलकण्ठभट्टो भगवद्भास्करग्रन्थश्च। तेन च तत्प्रणेतुर्भट्टनीलकण्ठस्येतरखण्डधर्मग्रन्थः प्रकृष्टमाप्ततमत्वं तेन च तदुक्तवाक्यानामशङ्कमादरपूर्वकमुपादेयत्वं तथाऽनुष्ठातृणाञ्चाऽऽभ्युदयिकश्रेयो भाजनताऽव्यभिचारश्चेति स्पष्टमवगन्तुं मन्तुं च न काऽप्यायासावश्यकतेति शिवम्।।

**पदवाक्यप्रमाणानां पारं यातस्य धीमतः ।**
**दैवज्ञचक्रवर्तित्वजुषः केशवशास्त्रिणः ।।**

**तत्पादसेवया लब्धमतिना धर्मसूनुना ।**
**कृतोऽयं निर्णयोल्लेखो विजयादशमीपरः ।।**

**समाप्तिमगमत्तेन तुष्यतां परमेश्वरः ।**
**समस्तजगतां धर्मरक्षको वृषभध्वजः ।।**

**नोद्दिश्य वित्तलाभं न कीर्तिलोभं न चापि पाण्डित्यम् ।**
**प्रकटयितुमेष यत्नो ममास्ति किंतु स्वधर्मरक्षायै ।।**

**अल्पज्ञत्वान्मनुजप्रज्ञानां विस्मृतिस्वभावत्वात् ।**
**यद्यन्मेऽत्र स्खलितं तत्परिहर्तुं क्षमन्त एवार्याः ।।**

**नित्यं ताटस्थ्यजुषः सत्यैकपरा निरभिमानाः ।**
**सन्तः सन्ति कियन्तस्तेभ्योऽहमुपायनीकरोम्येतत् ।।**